CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥अथकार्त्तिकादिमासेषुत्रयोदश्यांप्रदोषव्रतं॥ वर्षासंख्यावज्जीवंवा॥
शनियोगेमहाफलं॥ भैरवयोगेऋणमोचनं॥ तिथ्यादिसंकीर्त्य॥ आत्मनअखिलपापक्ष
यपरत्रुजयपूर्वकंआयुरारोग्यैश्वर्यपुत्रपौत्राद्यभिवृद्धयेउमामहेश्वरप्रीत्यर्थंआ
चरितप्रदोषव्रतोद्यापनंकरिष्ये॥ ब्रतार्चार्यः॥ उक्तप्रकारेणलिंगतोभद्रकलशंरू
प्यपूर्णपात्रयुतेसौवर्णंसांबसदाशिवंपुरतः राजतवृषभंतन्मंत्रैःप्रतिष्ठाप्य॥ पंचामृतैः
पूर्वं॥ असितांगभैरवाय॰॥ रुरुभैरवाय॰ चंडभैरवाय॰ क्रोधभैरवाय॰ उन्मत्तभैरवा
य॰ भीषणभैरवाय॰ संहारभैरवाय॰ कपालिभैरवाय॰ कालभैरवाय॰॥ इतिप्रतिष्ठा
प्यपूजयेत्॥ मूलमंत्रेणन्यासंकृत्वा॥ पंचब्रह्ममंत्रैःपूजयेत्॥ सद्योजातादिप्रकारां
तरेणपूजयेत्॥ प्रथमावरणं॥ पूर्वादिक्रमेणपूजयेत्॥ विघ्नं॥ अस्त्रायं॥ भारक्ष
रं॥ सोमं॥ इतिप्रथमावरणं॥ अर्कं॥ विजयं॥ गणपतिं॥ दुर्गां॥ इतिद्वितीयावरणं॥२

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नंदीशं॥ क्षेत्रपालं॥ वास्तोष्पतिं॥ वायुं॥ तृतीयाव०॥ कश्यपं॥ अत्रिं॥ भरद्वाजं॥ विश्वा
मित्रं॥ गौतमं॥ जमदग्निं॥ वसिष्ठं॥ चतुर्थाव०॥ भूतनाथं॥ पंचमाव०॥ इंद्रं॥ अग्नयेन०॥
यमाय० निर्ऋतयेन०॥ वरुणं० वायवेन० सोमं०॥ ईशानं॥ षष्ठमाव०॥ कपालिनं॥ स०
गंधर्वान्॥ अष्ट०॥ सद्योजातेति॥ आसनं॥ वामदेवाय० पाद्यं॥ अघोराय० अर्घ्यं॥ पंचु
रूपायेति॥ आचमनं॥ ईशानायेति॥ स्नानं॥ त्र्यंबकायेति॥ वस्त्रं॥ यज्ञोपवीतं॥ नमः से
नायेति॥ गंधं॥ नमः शंभवेचमयोभवेच॥ अक्षतान्॥ इमारुद्रायेति॥ पुष्पं॥ एकाधि
केति॥ बिल्वपत्रं॥ मानस्तोकेति॥ धूपं॥ ओंतत्पुरुषेति॥ दीपं॥ त्र्यंबकेति॥ नैवेद्यं॥
कद्रुद्रायेतितांबूलं॥ यातेरुद्रशिवातनूरघोरपापकाशिनी॥ सहस्रंते॥ इतिनमस्कारः॥
पुनः॥ नाममंत्रेणपुष्पांजलिप्रदक्षिणां॥ पुनः नाममंत्रेण नमस्कारांश्चकुर्यात्॥ भवाय० राम
महादेवाय० रुद्राय० नीलकंठाय० शशिमौलिनेनमः॥ उग्राय० भीमाय० ईशा ९

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

सहिरण्येणक्षम्यस्यजन्मन० रुद्रसुनोभव॥ मंत्रपुष्पांजलिंस०॥अर्घ्यं॥ रजताद्दिपात्रे
दधिक्षीरकुशतंडूलसिद्धार्थगंधपुष्पाणिक्षिप्त्वासजलंदद्यात॥ भयरोगादिदारिद्र्यपा
पक्षुरपमृत्यव॥॥ त्रैलोकमनस्तापानश्यंतुममसर्वदा॥ इत्यनेनत्रिवारंअर्घ्यंदद्यात॥
ततःप्रार्थयेत॥ प्रसीददेवदेवेशप्रसीदपरमेश्वर॥प्रसीदसोमसर्वज्ञप्रसीदकरुणा
कर॥ इतिप्रार्थना॥ ततःब्राह्मणान्संपूज्य॥रात्रिंनयेत॥ प्रातःअग्निंप्रतिष्ठाप्य॥
अत्रप्रधानं॥ उमामहेश्वरंतत्सुरुषायनमइतिमंत्रेणपलाशसमित्॥ बिल्वपत्र॥पाय
सान्नाज्यद्रव्येण्याप्रत्येकंअष्टोत्तरशतसंख्याकाहुतिभिः॥ पीठदेवताब्रह्मादिमंड
लदेवताएकैकयाज्याहुत्यायद्येत॥ ततःपीठंगोचरदत्वा॥ ब्राह्मणान्भोजयेदिति॥
इतिप्रदोषव्रतं॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi